संस्कृत

देवीसूक्त

क्र. नं. ८५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः॥ अथदेवीसूक्तंलिख्यते॥ अहंरुद्रेभिर्वसुभिश्च
राम्यहमादित्यैरुतविश्वदेवैः॥ अहंमित्रावरुणोभाबिभर्म्यह
मिंद्राग्नीअहमश्विनोभा॥ अहंसोममाहनसंबिभर्म्यहंत्व
ष्टारमुतपूषणंभगं॥ अहंदधामिद्रविणंहविष्मतेसुप्राव्ये
यजमानायसुन्वते॥ अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्र
थमायज्ञियानां॥ तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभू
र्यावेशयंतीं॥ मयासोअन्नमत्तियोविपश्यतियःप्राणितिय
ईंशृणोत्युक्तं॥ अमंतवोमांतउपक्षियंतिश्रुधिश्रुतिश्रद्धि

(2)

वं ते वदामि ॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानु
षेभिः ॥ यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां
॥ १ ॥ अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हंतवा उ ॥ अ
हं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ अहं सु
वे पितरमस्य मूर्धन्मम योनिरप्स्वंऽतः समुद्रे ॥ ततो वितिष्ठे
भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥ अहमेव वात इ
व प्रवाम्यारभमाणा भुवनानि विश्वा ॥ परो दिवा पर एना पृथि
व्यैतावती महिना संबभूव ॥ २ ॥ अथ देवीसूक्तं समाप्तः ॥

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com